International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(3): 43-45
© 2016 IJSR
www.anantaajournal.com
Received: 14-03-2016
Accepted: 15-04-2016

इंदुबाला
V.P.O सिंधवी खेड़ा, जींद हरियाणा

Correspondence
इंदुबाला
V.P.O सिंधवी खेड़ा, जींद हरियाणा

# रघुवंशे मानवमूल्यानि

**इंदुबाला**

रघुवंशः महाकवेः कालिदासस्याप्रतिममो ग्रन्थः। अस्य ग्रन्यस्य महाकविना सम्पृक्तौ' इति ध्वनिना श्रीगणेशं कृतम्। ग्रन्थेऽस्मिन् बह्वानि मानवमूल्यानि सन्ति येषाम् विचारः अस्मिन् शोधपत्रे अस्ति।

## सामाजिक मूल्यानि

सामाजिक मूल्येषु वर्णव्यवस्थाश्रमसंस्कारदामपत्यजीवनस्त्रीविमर्शशिक्षाऽऽदीनि तत्त्वानि विचारितानि।

## वर्णव्यवस्थाः

अस्मिन् महाकाव्ये गुणकर्माधारितां वर्णव्यवस्थां दर्शयन् श्लोकोऽयं दृष्टव्यः
व्यूढोस्को वृषस्कन्धः शालप्रांशुर्महाभुजः[1] आत्मकर्मक्षमं देहं क्षात्रो इव आश्रितः
अनेन प्रकारेव महाकाविना गुणकार्याधारितायाः वर्णव्यवस्थायाः अनुमोदन कृतम्। यावति वर्णव्यवस्था गुणकर्माधारिता तिष्ठति तावति समजस्य राष्ट्रस्य च सर्वोत्तमा स्थिति भवति। तस्या विद्रूपे जाति व्यवस्थायां तु राष्ट्रस्य दुर्गतिरेव भवति। वैदिकऋषयः मानवजीवनं चतुर्षु आश्रमेषु विनियोजित्वा सार्थिकाजीवनदृष्टिः प्रदत्तवन्तः। रघुवंशेऽपि महाकविः सूर्यवन्शीराजभिः वैदिक वर्णव्यवस्थायाः पालन कारितवान् यथा
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्। [2]
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।

## अथ च

वृद्धावस्थायां सांसारिकपदार्थेभ्यः विरक्तभूत्वा राजा दिलीपः वानप्रस्थधर्मेण देव्या सुदक्षिणया सह तपस्यार्थं वने जगाम। यतोहि वृद्धानां ऐक्ष्वाकूनां अयमेव कुलव्रतः आसीत्। मोक्ष एव जीवनस्य परमंलक्षयरूपेण स्वीकृतः यथा–
अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनः समाः[3]
तमः परमापदव्यं पुरूष योगसमाधिना रघुः।
अथ सर्वप्राणिषु समदर्शी राजा रघुः स्वपुत्रस्य रघोः अनुरोधात् केचन् समाः व्यतीत्य योगबलेन परमात्मतत्त्वं प्राप्तवान्। एवं प्रकारेण मोक्षरेव जीवनस्य पूर्णता।

## संस्काराः

महाकवि कालिदासः मानवमूल्यरूपे संस्काराणां यथाविध चित्रणं कृतवान्। राज्ञी सुदक्षिणायाः गर्भवतीसति राजा दिलीपः उदारभावेन पुंसवनादिसंसकारान सम्पादितवान यथा–
प्रियानुरागस्य मनः समुन्नते भुजार्जितानां च दिगन्त सम्पदोम्[4]
यथाक्रमपुंसवनादिकाः क्रिया धृतेश्चधीरः सदृशीर्व्यधत
तत्पश्चात् पुरोहितः वशिष्ठः तपोवनादागत्य तस्य बालकस्य जातकर्मादयान् संस्कारान् कारितवान्।

## यथा

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते।[5]
दिलीप सुनुमणिकरोद्भवः प्रयुक्तः संस्कार इवाधिकं बभौ।
तदनन्तरं मुण्डनसंस्कारस्योल्लेखमपि प्राप्नोति– स वृत्त चूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः।[6]
लिपेर्यथावद् ग्रहणेन वाङ्मयं नदी मुखेनेव समुद्रमाविशत।। यथाविधमुण्डनसंस्कारे सति विद्वान्सः गुरवः रघु विद्या प्रदत्तवन्तः। एवञ्च ते रघोः विषये स्वप्रयत्ने सफलीभूताः।
सत्यमेव सत्पात्राय प्रदत्ता विद्या विशेषफलवती भवत्येव।

यद्योपनीतं विधिवद्विपश्चितो विनिन्पुरेनं गुखो गुरूप्रियम[7]
अवन्ध्ययत्नाश्च बभूवुः ते क्रिया हि वस्तूपहिता प्रसीदति
तदनन्तरं युवावस्थायां प्रविष्टस्य रघोः द्वाविंशतितमे वर्षे केशान्तसंस्कारकृत्य राजकुमारिभिः विवाहोऽपि राज्ञा दिलीपेन कृतम्।

**यथा**

अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निवर्तयद् गुरूः[8] नरेन्द्रकन्या तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवावभुः

**दाम्पत्यजीवनम**

कालिदासस्य रघुवंशस्य आदिवाक्यं 'वागर्थाविव सम्पृक्तौ'[9] दम्पतिजीवनस्य परस्परायुतसिद्ध– सम्बन्धस्य द्योतकः। शिवश्च शक्तिरूपा पार्वती एकरूपौ एवं। तत्पश्चात् राज्ञः दिलीपस्य सुदक्षिणायाश्च वर्णनं प्राप्नोति।

**यथा**

तस्य दक्षिण्यरूढ़ेन नाम्ना मगधवंराजा[10]
पत्नी सुदाक्षिणेत्यासीदध्वरस्येव दक्षिणा
एवञ्च–
कलत्रवन्तमात्मानवरोधे महत्यापि[11]
तथा मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः
पुत्रस्य कामनया सः दम्पती प्राथ्म्येन ब्रहमार्चनं कृत्वा गुरोः वशिष्ठस्याश्रमाय प्रस्थितवान्।
एवं प्रकोरण राजा दिलीपः धर्मतः कामभुक्त्वा परिवारसमाजराष्ट्राणां प्रति स्वकीयान् कर्तव्यान् अपालयत्। अद्य जनसंख्यायाः विस्फोटः धर्मतः कामस्य पालनाभादेव। संख्याबले उतरोत्तर वर्धमानः भारतः गुणवत्तायां क्षीणतरः जायमानः।
एवञ्च गुरूवशिष्ठस्योल्लेखः अपि प्राप्नोति। राजा दिलीपः स्वपत्न्या सह वशिष्ठस्याश्रमे गत्वा गुरूवशिष्ठं स्वपत्न्या अरून्धत्या स्वाहया सेवितमपश्यत्–
विधेसायन्तनस्यान्ते स ददर्श तपोनिधिम्[12]
अन्वासितमरून्धत्या स्वाहयेव हविर्भुजम्।
अत्र दम्पतेः सहभावैव नाभिष्टः अपितु परस्परसत्यभानोऽपि इष्टः।

**परिवारिक जीवनमः**

सुदक्षिणादिलीपयोः चक्रवाकयुगलवत् प्रेमासीत् एकमात्रे रघौ विभाजित्वाऽपि तद् पारस्परिके प्रेम्णि न्यूनतायाः आधानकरणे न सक्षममभवत्। अपितु उत्तरोत्तरां वृद्धिमेव प्राप्तवान यथा–
रथाङ्गनाम्नोरित भावबन्धनं बभूव सत्प्रेम परस्पराश्रयम्[13] विभक्तमपि एकेन सुतेन तत्तयोः परस्परस्योपरिपर्चचीयत बालकः रघुः धात्रा आधिगतान् वचनान् यदा प्राथ्म्येन उच्चरितवान् तस्य पिता दिलीपः अपूर्वमानन्दं प्राप्नोत्
रघोः जन्मोपरान्तं राजा दिलीपः तथैव सन्तुष्टो बभूव तथा ब्रहमा स्वसत्त्वांशेन विष्णूभूय बभूव[13] एवञ्च येन प्रकारेण कार्तिकेयं प्राप्वा शिवपार्वत्यौ, जयन्तं प्रात्वा शचीन्द्रौ प्रसन्नाः बभुवुः तनैव प्रकारेण रघुं प्राप्य दिलीपसुदक्षिणे प्रसन्ने बभुवतुः।
राजत्वम्ः– राजा रघुवंशे उच्चकुलीयत्वेनाभिहितः। यथा राजा दिलीपः उच्चकुलीयारित्त। यथा च कालिदासः राज्ञः दिलीपस्य वर्णनं करोति यत्– आजीवनपवित्रसंस्कारवान्
आफलप्रयत्नवान् आसमुद्रसाम्राज्यवान्, आस्वर्गस्थयांत्रिणः वर्णनमहम् चिकीर्षामि।[14]
राजा दिलीपः उच्चमानवमूल्यैः मण्डितः आसीत्। कालिदासेन ऐक्ष्वाकाणां वर्णने उक्तम यत् ते त्यागाय अर्थानां सम्भर्तारः आसन्, सत्याय मितभाषिणः आसन् यशसे विजीगीषवः आसन् प्रजायै ग्रहमेधिनः आसन्।[15]

**राज्ञः कर्तव्याः**

राजा दिलीपः प्रजायाः कल्याणायैव तेभ्यः बलिः तेनैव प्रकारेण गृहणाञ्चकार यथा सूर्यः स्वरश्मिभिः स्वल्पं जलं गृहीत्वा लोककल्याणार्थं सहस्नधाकृत्य प्रतिददाति

स्वप्रजां नम्रतायाः सदाचारस्य च शिक्षणेन तेषाम् आपन्निनिषकृत्य रक्षकत्वात् च तेषां भरणपोषणात् सः राजा दिलीपः वस्तुतः प्रजापिता आसीत्। पितेति नाम्नाा अभिधीयन्तः तु नाम्ना एव पितरः आसन्
केवलं नाम्ना एवं पितरः आसीत् [17]। राजा दिलीपः लोकमर्यादार्थमेव अपराधिनः दण्डयति स्म।[18] सः यज्ञार्थमेव प्रजातः तेनैव प्रकारेण बलिः ग्रहीतवान तथा ईन्द्रः अन्नोप्रादनाय अन्तरिक्षं दोग्धि।[19]
सज्जनपुरूषाः शत्रुत्वेऽपि राजानम दिलीपं तथैव प्रियाः आसती यथा रोगिणम् कटुकौषधिः भवति। एवञ्च दुष्टमनुष्यः बन्धुत्वेऽपि तथेव त्याज्यासीत् तथा सर्पदंशिता अंगुली भवति।[20]
उपर्युक्तैः मानवमूल्यैः अभिषिक्ता राजनीतिः एवं कस्यापि राष्ट्रस्य आधारश्लिास्यापने सक्षमाऽस्ति। महाकविः कालिदासः वंशपरम्परापूतमुदात्तगुणयुक्तं व्यक्तिमेव राजा रूपेण चिनोतुमिच्छति यतोहि तदैव राष्ट्रस्य भविष्यः तस्यहस्ते सुरक्षितं भवितुं शक्यते। कालीदासः प्रजायै राजचयने विशेषया सावधान्याः परामर्शं ददाति यतोहि अध भ्रष्टराजने तध्णाम् अपराधीकरणात् देशस्य या दुर्गतिः जाता तस्या कुत्रचित् प्रजायाः नेतृत्व चयने उदासीनताऽपि उत्तरदायिनी वर्तते।

**प्रजायाः कर्तव्याः**

राजादिलीपस्य शासने प्रजा किञ्चिन्मात्रेणाडपि भगवतो मनोः नियमान नोल्लङ्घयाञ्चकार गुरोः वशिष्ठस्य धर्मिकानुष्ठानेश्यः राज्ञः दिलीपस्य प्रजावर्गेः शतजीवी निर्भीकश्चासीत्। अतिवृष्टि– अनावृष्टि भिश्च राहित्येन सुखमयं जीवन यापितवान्।

**नारीचिन्तनमः**

आचार्येण मनुना उपदिष्टायाः यत्र नार्यस्तु भावनायाः राजा दिलीपः पूर्णतया पालन करोति स्म। सः राज्ञा सुदक्षिणां पृथिवीवत्, स्वान्तेऽग्नि गृहीता शमीकवृक्ष वत्, अन्तर्निहितजलं प्रवाहयमाना सरस्वतीवत् अवगच्छति स्म।
अनेनैव प्रकारेण राजा रामोऽपि सीतां तस्याः दोहदं पृच्छति स्म। सीतोपरि पतितं मिथ्यालोकापावादं श्रुत्वा तस्य हृदयः तथैव अस्फुरत् यथा लोहधनेन तप्तायः स्फुटयति। सः सीतां सर्वथा निर्दोषां स्वीकरोति।
लक्ष्मणोऽपि स्वभातृजायां विवशत्वेऽपि ऋषेः वाल्मीकस्याश्रमस्य समीपे त्यक्तवान्।
राष्ट्रीयचेतना–
सर्वप्रथमं राज्यस्य कुशलक्षेमातुरता ऋषेः वशिष्ठस्य राष्ट्रस्य प्रति प्रेम्णः सूचकमस्ति। प्रत्युत्तरे राज्ञः स्वराज्य प्रति सजगता दर्शनीया। ऋषेः वरतनोः शिष्यः कौत्सस्य दक्षिणार्थे प्राप्ते सति राजा रघुः स्वराज्यं प्रति उत्कंठितभूत्वा प्रश्नान् पप्रच्छ। तस्योत्कण्ठा राष्ट्रप्रेम्णः परिचायिका। रघुवंशे वैश्विक पर्चावरणीयचिन्तनमपि दृश्यते।

**धार्मिकदार्शनिकमूल्यानिः**

राजा दिलीपः तपदानयोः महत्त्व प्रतिपादयति दिग्वियोपरान्तं राजा रघुः विश्वजित् यज्ञं प्रारम्भत्। अस्मिन् यज्ञे सर्वं दानीयं वर्तते। यथा मेघः समुद्रात् जल–गृहणं वर्षणाय कुर्वन्ति तथैव राजा रघुः धनसंग्रहणं दानायैव करोति स्म। दानाय न केवल पृथिव्याः अपितु कुबेरस्यापि दोहनं सः कृतवान्।
पतिपरित्यक्ता सीता आगमिनि जन्मन्यपि राममेव पतिरूपेण प्राप्तये चाखण्डदाम्पत्य जीवनाय तपसः कृते आतुराजाता। राजा दिलापोऽपि यज्ञेन राज्यस्य समृद्धिः पवित्रप्रदूषणमुक्त– वातावरणाय ऋषेः वशिष्ठस्य धन्यवादः करोति।

**राजनैतिकमूल्यानि**

राजनीतिशास्त्रवेत्तारः रघोः समक्षे सत्यासत्यौ पक्षौ प्रस्तुतवन्तः। किन्तु सः केवलं सत्यपक्षमेव स्वीकृतवान्। रघुः दिग्विजये केवला धनलक्ष्मीमेवाहरत् न पृथ्वीम। अथर्ववेदस्य ज्ञात्रा ऋषि वशिष्ठेन संस्कारितः अजः शत्रुणां कृतेऽजेय बभूव। श्रात्रतेजसा ब्रह्मतेजसः सम्मेलनः भयङकरः अग्निवायूसंयोगवत्। अत्र वायुः शक्तेः अग्निश्च

ज्ञानस्य प्रतीकः अतः राज्ञा शक्त्या सह ज्ञानेनापि सम्पन्नष्वम् आवश्यकं वर्तते। तदैव तस्य शक्तेः राष्ट्रकल्याणाय विवियोजनं भवितुं शक्यते।

अध राजनेध्तणां नैतिकपतनस्य प्रमुखकारणं तेषां ब्रहमक्षात्रतेजसोः अभावः एव। अतः राजनीतिः राजनेध्तणां कृते कामधेनुः जाता। यत्र अर्थकांक्षतः नेतारः स्वकामनाना पूर्तये आगच्छन्ति न तु समाजसेवार्थम। क्षात्र तेजसः राजनीत्याः विलगनं कष्टकरं जातम्। सैनिकाः सीम्नि स्वप्राणान् पणयन्ति च राजनेतारः रातरञ्जक्रीडां क्रीडन्ति। संसदि विधानसभासु च तेषां भ्रष्टाचरणं दृश्यते। अनेन तेषां ब्राहमतेजसः हीनत्वमेव दृश्यते।

**संदर्भ ग्रंथ**


1. रधुवंश 1.13
2. रघुवंश 1.8
3. रघुवंश 8.24
4. वही 3.10
5. वही 3.18
6. वही 3.28
7. वही 3.29
8. रघुवंश 3.33
9. रघुवंश 1.1
10. वही 1.31
11. वही 1.32
12. वही 1.56
13. वही 3.24
14. वही 1.5
15. वही 1.7
16. वही 1.18
17. वही 1.24
18. वही 1.25
19. वही 1.26
20. वही1.28